ध्यानयोगेन देवस्य निर्धूताशेषकल्मषः।
आस्ते परिचरन् भक्त्या महाभागवतोत्तमः॥"
तथाच मात्स्ये। ११२। १०॥ वैष्णवे। २।२।१३॥ ब्राह्मे च। ६। १। ७॥ द्रष्टव्यम्॥) पटोलमूलम्। इति त्रिकाण्डशेषः॥ (यथा, सुश्रुते। १। ३६ अध्याये।
"कम्पिल्लकरम्यकपाटलापूगहरीतक्यादयः॥"
पुं, आग्नीध्रपुत्रभेदः। एतन्नामानुसारेणैव रम्यकवर्षोऽभवत्। यथा, भागवते। ५। २। १९।
"तस्यामु ह वा आत्मजान् स राजवर्य्य आग्नीध्रो नाभिकिंपुरुषहरिवर्षेलावृतरम्यकहिरण्मयकुरुभद्राश्वकेतुमालसंज्ञान् नवपुत्रानजनयत्॥")

रम्यपुष्पः, पुं, ( रम्यं दर्शनीयं पुष्पमस्य। ) शाल्मलिवृक्षः। इति राजनिर्घण्टः॥ (शाल्मलिशब्देऽस्य गुणादयो ज्ञेयाः॥)

रम्यफलः, पुं, ( रम्यं फलमस्य। ) कारस्करवृक्षः। इति राजनिर्घण्टः॥

रम्या, स्त्री, ( रमतेऽस्यामिति। रम+"पोरदुपधात् यत्।" ३। १। ९८। इति यत्। टाप् च। ) रात्रिः। इति मेदिनी॥ स्थलपद्मिनी। इति राजनिर्घण्टः॥ ( गङ्गा। यथा, काशीखण्डे तत्सहस्रनामकीर्त्तने। २९। १४५।
"रेवती रतिकृद्रम्या रत्नगर्भा रमा रतिः॥")

रम्रः, पुं, (रम्+स्फायादित्वात् रः।) मदयवर्णः। शोभा। इत्युणादिकोषः। २। २३८॥

रय, ङ गतौ। इति कविकल्पद्रुमः॥ (भ्वा॰-आत्म॰-सक॰-सेट्।) ङ, रयते। इति दुर्गादासः॥

रयः, पुं, ( रयते अनेनेति। रय+"पुंसि संज्ञायां घः प्रायेण।" ३। ३। ११८। इति घः। रीयतेऽनेनेति वा। री गतौ+अप्रत्ययेन साधुरिति।) वेगः। इत्यमरः।१।१।६७॥ प्रवाहः। यथा,—
"प्रवाहः पुनरोघः स्यादेणो धारा रयश्च सः॥"
इति हेमचन्द्रः॥
(यथा, महाभारते। २। १७। ६।
"कथमन्तं न गच्छेम वृक्षस्येव नदीरयाः॥"
पुरूरवसः पुत्रभेदः। यथा, भागवते।९।१५।१।
"ऐलस्य चोर्व्वशीगर्भात् षडासन्नात्मजा नृप।
आयुः श्रुतायुः सत्यायू रयोऽथ विजयो जयः॥")

रराटी, स्त्री, (ललाट+रलयोरैक्यात् लस्य रत्वम्। ततो ङीप्।) ललाटः। इति पुराणम्॥ (यथा, भागवते। २। १। २८।
"तस्य रराटौ विबुधादिपुंसः
सत्यन्तु शीर्षाणि सहस्रशीर्ष्णः॥")

रल्लकः, पुं, ("रमणं रत् क्विप्यनुनासिकलोपे रत् इच्छा तां लाति कः रल्लस्ततः स्वार्थे कन्।" इत्यमरटीकायां रघुनाथचक्रवर्त्ती।) कम्बलः। इत्यमरः॥ पक्ष्म। इति सुभूतिः॥ मृगविशेषः। इति मुकुटः॥

रव, ङ व्रजे। इति कविकल्पद्रुमः॥ ( भ्वा॰-पर॰-सक॰-सेट्। ) ङ, रवति। इति दुर्गादासः॥

रवः, पुं, ( रूयते इति। रु ध्वनौ+भावे अप्। ) शब्दः। इत्यमरः॥ (यथा, रघुः। ९। ५४।
धनुरधिज्यमनाधिरुपाददे
नरवरो रवरोषितकेशरी॥")

रवणं, क्ली, ( रौतीति। रु+युच्। ) कांस्यम्। इति हेमचन्द्रः॥ ( रु+भावे ल्युट्। ) रवश्च॥

रवणः, पुं, ( रौतीति। रु+"सुयुरुवृञो युच्।" उणा॰ २। ७४। इति युच्। ) उष्ट्रः। इति हेमचन्द्रः॥ (यथा, माघे। १२। ९।
"उत्थातुमिच्छन् विधृतः पुरोबला-
न्निधीयमाने भरभाजि यन्त्रके।
अर्द्धोज्झितोद्गारविभर्भरस्वरः
स्वनाम निन्ये रवणः स्फुटार्थताम्॥")
कोकिलः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

रवणः, त्रि, ( रु+युच्। ) शब्दनः। तीक्ष्णः। भण्डकः। चञ्चलः। इति शब्दरत्नावली॥

रवथः, पुं, ( रु+"शीङ्शपिरुगमिवञ्चिजीविप्राणिभ्योऽथः।" उणा॰ ३। ११३। इति अथप्रत्ययः। ) कोकिलः। इत्युणादिकोषः॥

रविः, पुं, ( रूयते स्तूयते इति। रु+"अच इः।" उणा॰ ४। १३८। इति इः। ) सूर्य्यः। अर्कवृक्षः। इत्यमरः॥ सूर्य्यस्य भोग्यं दिनं वाररूपम्॥ यथा,—
"रवौ वर्ज्ज्या चतुः पञ्च सोमे सप्त द्वयं तथा॥"
इत्यादिवारवेलाकथने समयप्रदीपः॥
तत्र निषिद्धानि यथा,—
"माषमामिषमांसञ्च मसूरं निम्बपत्रकम्।
भक्षयेद्यो रवेर्व्वारे सप्तजन्मस्वपुत्रकः॥
आर्द्रकं मधु मत्स्यञ्च भक्षयेद्यो रवेर्दिने।
सप्तजन्म भवेद्रोगी जन्म जन्म दरिद्रता॥
निम्बं मांसं मसूरञ्च बिल्वकाञ्जिकमार्द्रकम्।
भक्षयेद्यो रवेर्व्वारे सप्तजन्मस्वपुत्रकः॥"
इति कर्म्मलोचनम्॥ *॥
रविग्रहस्य रक्तश्याममिश्रितवर्णः। अयं पूर्व्वदिक्पुरुषक्षत्रियजातिसत्त्वगुणकटुरससिंहराशिस्वस्थानयवनशमीनिर्यितास्त्रकलिङ्गदेशानामधिपतिः। काश्यपगोत्रः। द्वादशाङ्गुलशरीरः। पद्महस्तद्वयः। पूर्व्वाननः। सप्ताश्ववाहनः। शिवाधिदैवतः। रुद्रप्रत्यधिदैवतश्च। इति ग्रहयज्ञतत्त्वादयः॥*॥ अस्य व्युत्पत्तिर्यथा,
"अवतीर्णाश्च यो लोकांस्तस्मात् सूर्य्यः परिभ्रमात्।
अचिरात्तु प्रकाशेत अवनात् स रविः स्मृतः॥"
इति मात्स्ये १०१ अध्यायः॥ *॥
अस्य भार्य्यापत्यानि यथा,—
"मरीचेः काश्यपो जज्ञे तस्माज्जज्ञे विभावसुः।
तस्य भार्य्याभवत् संज्ञा पुत्त्री त्वष्टुः प्रजापतेः॥
त्रीण्यपत्यानि राजेन्द्र! संज्ञायां महतां निधिः
आदित्यो जनयामास कन्याञ्चैकां सुलोचनाम्।
वैवस्वतं मनुश्रेष्ठं यमञ्च यमुनां ततः॥
नातितेजोमयं रूपं सोढुं भानोर्विवस्वतः।
मायामयीं ततश्छायां सवर्णां निर्म्ममे स्वतः॥
संज्ञोवाच ततश्छायां सवर्णे शृणु मे वचः।
अहं यास्यामि सदनं पितुस्त्वं पुनरत्र मे।
भवने वस कल्याणि! निर्व्विशङ्कं ममाज्ञया॥
मनुरेष यमश्चैतौ यमुनायमसंज्ञकौ।
स्वापत्यदृष्ट्या द्रष्टव्यमेतद्बालत्रयं त्वया॥
न वक्तव्यमिदं वृत्तं त्वया पत्यौ कदाचन।
इत्याकर्ण्याथ सा त्वाष्ट्रीं देवी छाया जगाद ताम्॥
आकचग्रहणान्नाहमाशापाशे कदाचन।
आख्यास्यामि चरित्रं ते याहि देवि! यथासुखम्॥
इति च्छायां गृहे स्थाप्य संज्ञागात् पितुरालयम्।
उवाच पितरं देवी जामातुस्तव न क्षमा॥
तेजः सोढुमहं तात! काश्यपस्य महात्मनः।
तन्निशम्य चुकोपासौ भर्त्सयामास कन्यकाम्॥
मत्तः श्रेयः कथं वा स्यादिति सा परिचिन्त्य च।
अगच्छद्वडवा भूत्वा चरन्ती चोत्तरान् कुरून्॥
तपस्तेपे च सा तीव्रं यतिमाधाय चेतसि।
मन्यमानोऽथ तां संज्ञां सवर्णायां तथा रविः॥
सावर्णिं जनयामास मनुश्रेष्ठं महीपते।
शनैश्चरं द्वितीयञ्च सुतां भद्रां तृतीयिकाम्॥
सवर्णा स्वेष्वपत्येषु सापत्न्यात् स्त्रीस्वभावतः।
चकाराभ्यधिकं स्नेहं न तथा पूर्व्वजेष्वहो॥
चिरमालोक्य तां भार्य्यां उवाच सविता वचः।
अयि भामिनि बालेषु समेष्वपि कुतस्त्वया॥
विधीयतेऽधिकः स्नेहः सावर्ण्यादिसुतान् प्रति।
नाचचक्षे तदा साथ भास्वते परिपृच्छते॥
ततः समुद्यतं शप्तुं छाया सर्व्वं शशंस ह।
यथा वृत्तं तथा तथ्यं तुतोष भगवान् रविः॥
निरागसं न शशाप जगाम त्वष्टुरन्तिकम्।
त्वष्टापि च यथान्यायं सान्त्वयित्वाथ काश्यपम्।
निर्दग्धुकामं कोपेन प्रार्थयेश सुदा तदा॥
त्वष्टोवाच।
तवातितेजसो भीता प्राप्योत्तरकुरून् वने।
वडवारूपमास्थाय संज्ञा चरति शाद्वले।
द्रष्टा हि तां भवानद्य स्वभार्य्यां तात मा रुष॥
लब्धानुज्ञोऽथ सविता गत्वोत्तरकुरूनथ।
स हरिर्हरिरूपेण मुखेन समताडयत्॥
त्वरमाणा च सवितुः परपूरुषशङ्कया।
सा तन्निरवमत् शुक्रं नासिकाभ्यां विवस्वतः।
देवौ तस्मादजायेतामश्विनौ भिषजां वरौ॥"
इति पाद्मे स्वर्गखण्डे ११ अध्यायः॥
( अन्यत् सूर्य्यशब्दे द्रष्टव्यम्॥ )

रविकान्तः, पुं, ( रविणा रविकरसंयोगेन कान्तः कमनीयः। ) सूर्य्यकान्तमणिः। इति राजनिर्घण्टः॥

रविचक्रं, क्ली, ( रवेश्चक्रम्। ) नराकारसूर्य्यचक्रविशेषः। यथा,—
"लिख्यते रविचक्रन्तु भास्करो नरसन्निभः॥
यस्मिन्नृक्षे भवेत् सूर्य्यस्तच्चादौ त्रीणि मस्तके।
अधं वक्त्रे प्रदातव्यमेकैकं स्कन्धयोर्न्यसेत्॥
एकैकं बाहुयुग्मे तु एकैकं हस्तयोर्द्वयोः।